# भूमिका

वागार्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।
तत्पदं दर्शितं येन तस्मै श्री गुरुवे नमः।।

परमकरुणालयस्य सर्वभूतहृदयस्थस्य भगवतो भूतभावनमहादेवस्य सर्वलोकहितपरायणाया वात्सल्यभावभरितायाः मातुर्महाकालिकायाश्च परमकृपया '' **''महर्षिवशिष्ठ–कृत धनुर्वेदसंहितायाः समीक्षात्मकमध्ययनम''** इति विषयमादाय संग्रथितोऽयं शोधप्रबन्धः साम्प्रतं निर्विघ्नतया पूर्णतामेतीति मत्कृते महान् हर्षप्रकर्षविषयो च। सत्यमस्ति यत् ईश्वरेच्छां विना कस्यचिदपि लघुतमस्यापि कार्यस्य पूर्णताया कथा तु दूर›ता तत्कल्पनापि कर्तुं न शक्यते।

ईश्वरस्य हि वशे लोको येषां दारुमयी यथा।
अधिष्ठानं तथा कर्ता करणञ्च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवचैवाप्त पञ्चमम्।।

अन्यञ्च 'बलीयसी केवलमीश्वरेच्छा'' इत्यादि प्रमाणैः सुसिद्धयति यत् सकलकर्माणां प्रेरको महेश्वर एव भवति वयं तु केवलं कारणभूता निमित्तमात्रं वर्तामहे। अतः परकारुण्यकयोः भगवतोः महाकालीमहादेवयोः श्री चरणकमेष्वेव 'त्वदीयं वस्तु शिवा–शिव तुभ्यमेव सर्मपये।' इति भागवनाभरितमानसोऽहं कार्यमिदं समर्पयामि सश्रद्धं स्वयं प्रणतिनिवेदनं च विनिवेदयामि।

जगत्यस्मिन् सकलमनुष्याणां प्रवृत्तिः पुरुषार्थचतुष्टये धर्मार्थकाममोक्षेषु एवाविर्भवतीति। तत्र प्रथमपुरुषार्थेन धर्मेणैव अवशिष्टत्रयाणां सिद्धिः सम्पादनीय। अतः खलु प्रथमपुरुषार्थः प्राधान्यमावहते।

महर्षिणा वेदव्यासेनापि उक्तञ्च –

ऊर्ध्वबाहुर्विशैम्येष न च कश्चिच्छृणेति मे।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।।

आर्यसंस्कृतौ धर्मतत्वं मूलाधाररूपेण विद्यते। तत्र वेदा एव प्रमाणिमिति धिषणया तद्गतप्रमाण्यमेव महर्षिभिरुररीकृतम्। वेदानां लोकभोग्यभाजनाय ब्राह्मणाऽऽरण्यक श्रुति–स्मृति–पुराणोपवेदग्रन्थाः प्रणिनिन्युः महर्षयः।

अपि च तेषु धर्मसाधनाय ऋषिमुनिभिः शास्त्राणां उपदेशो कृतः शास्त्राणि बहूनि सन्ति, मानवजीविकायापनाय अर्थधर्म–नाट्य–काम–काम–अहंकार–वास्तु–शिल्प–काव्य–चिकित्सा–सङ्गती–नृत्यादीनां विषयान् स्वीकृत्य विषयानुरेण महर्षिभिः स्वप्रतिभाबलेन शास्त्राणि निर्मितनि च। किन्तु तेभ्यः शास्त्रेभ्यः मानवञ्च मानवसम्पत्याः सभ्यतायाः संस्कृत्याञ्च संवर्धन–पोषणञ्च भेवत् न संरक्षणम्। तेषां संरक्षणाय महर्षिभिः शस्त्राशस्त्रमधिकृत्य यजुर्वेदोपवेदानागर्त 'धनुर्वेदः' इति नामच्छायां ग्रन्थाः प्रणिताः।

अस्मिन्नकाले धनुर्वेदः किं वा युद्धशास्त्रानेका ग्रन्थाः विलुप्ता सन्ति। यथा उपवेदविषयामाधारीकृत्य अनेका ग्रन्थाः पूर्व आसन्। तेभ्यः केचित्लुप्ताः अमुद्रिताः च सन्ति।

पुराणकाले धनुर्वेदस्य पठनपाठनमावश्यकमासीत। प्रत्येकऋषिणामाश्रमे अनेकज्ञानविज्ञानानां परम्पराभिः एव धनुर्वेदस्योऽपि पाठनपाठनं भवतीति।

रामायणे–महाभारते–पुराणेषु च धनुर्वेदस्यानेकाः गुरुपरम्पराः प्रचलिताः यथा–

गौतपरम्परा – कृपाचार्यः
भार्गवपरम्परा– जमदग्नि–परशुरामः
भारद्वाजपरम्परा– द्रोणाचार्यः
वशिष्ठपरम्परा– भगवान्तरामचन्द्रः।

एवं च प्रचीनकाले धनुर्वेदस्य विपुलप्रमाणेन प्रचार–प्रसारो भवतीति। किन्तु आधुनिकयुगे धनुर्वेदः प्रायः लुप्तप्रायो जातः। हस्तप्रतभण्डारेषु अस्य

ज्ञानराशेः अनेके ग्रन्थाः संग्रहीता। किन्तु महर्षिवशिष्ठस्य संहितो त्यक्त्वा तस्य कोऽपि स्वतन्त्रग्रन्थो प्रकाशितो नास्ति।

अस्य धनुर्वेदस्य ऋषिमुनिभिः प्रखरतपसत्वबलेन ज्ञानस्य समाजे पुरः प्रतिष्ठां प्राप्यत्यर्थे च पठनपाठनञ्च प्रचारप्रसारं भवेत् एवं विचारो मनसि निधाय अहं अस्य विषयं स्वीकृत्य शोधप्रबन्धं सड.ग्रथितम्।

अस्मिनप्रबन्धे चत्वाराध्यायाः प्रदर्शिताः। तत्र–

**प्रथमेऽध्याये** धनुर्वेदसंहितायाः कर्ता महर्षिवशिष्ठस्य संस्कृतवाङ्मय–प्रदानाय तस्य जीवनपरिचयं च दत्तम्। वशिष्ठशब्दस्य व्युत्पत्ति वेदादरभ्य महाभारते– रामायणे पुराणेषु च यत्र–तत्र महर्षिवशिष्ठस्य यदुल्लेखाः सन्ति तानुल्लेखान् संगृह्य महर्षिवशिष्ठस्य कालनिर्णयाय प्रयत्नः कृतः।

**द्वितीयेऽध्याये** उपवेदानां परिचयं प्रदर्शितानि। चत्वारवेदानां चत्वारोपवेदाः ईदृशी अस्ति। तद्यथा –

1. ऋग्वेदः – स्थापत्यवेदः
2. यजुर्वेदः – धनुर्वेदः
3. सामवेदः – गान्धर्ववेदः
4. अथर्ववेद– – अर्थवेदः वा आयर्वेदः

उपवेदानां महत्वं वैशिष्ट्यञ्च दर्शितम्। अस्मिन् अध्याये धनुर्वेदसंहितायां विस्तृतो परिचयोः प्रदत्तः। वशिष्ठ–विश्वमित्रयोः संवादे प्रश्नोत्तररूपेण संस्थितायां संहितायां धनुर्दानविधिः, गुरु–शिष्ययोः आधिकारित्वम्–सेनानायको–सैन्यरचना–रथ–हस्ति–अश्व–पदाति –विविधानि अस्त्राणि–शस्त्राणि शुभधनुः–वर्जिनधनुः–प्रत्यञ्चा–बाणानि–युद्धानि– व्यूहादिनानेकानि विषयानि वर्णितानि सन्ति।

**तृतीयेऽध्याये** धनुर्वेदसंहितायां वर्णितास्त्रशस्त्राणां परिचयं अन्येषु ग्रन्थेषु तत्सन्दर्भितुल्लेखैः सह अस्त्रशस्त्राणां चतुर्भेदाः कृताः। यथा –

1. मुक्तम् बाणादि त्यक्त्वायुद्धानि।
2. अमुक्तम् खडगादि हस्ते धारयित्वा हस्तेन युद्धानि।

3. मुक्तामुक्तम्   हस्ते धारयित्वा, हस्तेन त्यक्त्वा च द्वयेन

प्रकारेण योद्धव्यम्।

4. मन्त्रमुक्तम्   तानि अस्त्राणि मन्त्रेण सञ्चालितानि। अत्र संहितायां प्रतिपादितलक्षणानां समीक्षां कृत्वा अध्यायपूर्णं कृतम्।

**चतुर्थेऽध्याये** सम्पूर्णशोधप्रबन्धस्योपसंहारः कृत्वा तस्यनिष्कर्षो प्रदर्शितम। अस्य पुरातनयद्धशास्त्रस्य अद्यतनेऽस्मिन्युगे किम् आवश्यकम् ? तस्य विवेचना कृत्वा युद्धविषस्य यर्थाथ्यं मया स्थापयित्वा प्रबन्धो पूर्णो कृतम् मया।

**पर्यन्ते च मयोपसंहारः** संश्लिष्टः। ततः परं आधारग्रन्थानां नामानि च लिखितानि ।

## कृतज्ञता–ज्ञापनम्

अस्मिन् शोधप्रबन्धे यानि कार्याणि मया कृतानि तत्रापि अनेकैः महानुभावैः मदीया सहायता कृता। तेषां समेषां उपकारभारं वहामि। तद्यथा–

शोधप्रबन्धस्य लेखन कार्यमिदमत्यन्तं दुष्करमासीत्। यदि महनीयानां विदुषां साहय्यं मया नाधिगतमभविष्यति तर्हि कार्यमेतत् केवलं कल्पना प्रसूतमेवााभविष्यत्। स्वल्पबुद्धिना विशालशास्त्रस्याभावोबोधबुद्धि शक्तिसहितेन मयैकविना गुरुणां विदुषां सहाय्यं विना न किमपि कर्तुं सम्भवमासीत्। अतः दुरुहेऽस्मिन् शोधप्रबन्धलेखनकार्ये येषां महापुरुषाणां परमविदुषां शुभाशीर्वादेन असीमानुकम्पया वात्सल्यभावेन विविध सहयोगेन च यदि शक्तिर्मयाधिगता तस्याः शक्ते फलमिदं यत् शोधकार्यमिदं सफलतापूर्वकं सुसमप्तिं गच्छतीति।

अत्यन्तं प्रसन्नधीरहं स्वपुनीतकर्तव्यतया तेभ्यः सर्वेभ्योऽपि गुरुचरणेभ्यो महापुरुषेभ्यश्च हार्दिकं कार्तज्ञं समर्पयामि।

तेषु मद्धितचिन्तकेषु गुरुवर्येषु मुख्याः सन्ति। नैकशास्त्रपार›ताः व्याकरणशास्त्रेऽप्रतिहतगतयः वेदोपवेदवेदा›वेदान्तादि विविध विद्यावन्तो अन्येषु च दर्शनसाहित्यादिशास्त्रामर्मज्ञाः छात्राऽनुकूल्यमेवस्वानुकूल्याः न केवलमध्ययनाध्यापनकुशलाः एवापि तु प्रशासनादिकयेष्वपि कौशल्यगुण –सम्पन्नः विद्वद्ग्रण्याः महाराजासयाजीरावविश्वविद्यालयस्यान्तर्ग वटोदर –संस्कृतमहाविद्यालयस्य पारम्परिकाध्ययनकेन्द्रस्य विभागाध्यक्षपदं विभूषयन्तः परमन्त्रृजुस्वभावाः मम् शोधनिर्देशकाः प.पूज्य डॉ. रामपालशुक्ल महोदयाः, येषां सहयोगभावनाया मद्धितकामनायाश्च पुरतोऽहं सर्वदा

नतमस्तकः सन् स्वीयां हार्दिकीं कृतज्ञतां विनिवेदयामि तवचरणपल्लवेषु। मम् मार्गदर्शकाः अत्यन्तं श्रद्धया विनम्रचेतनया च सम्मानयन्ते येषां

समुदारभावनाया प्रबन्धनिर्माणे समागतकाठिन्यानिवारणेन ममायं निबन्धः सरलतया पूर्णतां प्राप्तः। गुरुचरणानाऽक्षरैः पदैर्नवा वाक्यैर्वाऽन्यप्रकारैः च कृतज्ञतां ज्ञापयितुं शक्नोमि। एतेषां चिरस्वस्थ्यजीवनाय परमपितामहादेवं प्रार्थयामि। येन देववाण्याः सरभारत्याश्च संवर्धनं भवेत्।

अस्मिन्नक्रमे वत्सलमूर्तिणां सहित्यदर्शनादिशास्त्रेष्वपिलब्धाधिकाराणां छात्रोत्कर्षविकासचिन्तकानां अनुशासनप्रियाणां निष्ठयास्वकर्तव्यपालन–परायणानां सरदारपटेलविश्वविद्यालयस्यान्तर्गत –एन.एस.पटेल विनयन महाविद्यालये संस्कृतविभागाध्यक्षपदे आसीना श्रीमती डॉ. हेमाबेन सोलंकी महाभागानां श्रीचरणेषु प्रणम्य निवेदनपूर्वकं स्वीयं हार्दं कार्तज्ञं विभर्मि। यासामविस्मरणीयः सहयोगो मया स्वशोधनकर्मणि समधिगतः। यतो ही हेमाबेन गुरुवर्याणां न केवलं शोधकर्मण्येवापि तु मम सकलजीवनोत्कर्षस्य सर्वाविधक्षेत्रेषु सर्वदा पथप्रदर्शनं मया लब्धं लभ्यते च साम्प्रतमपि अतः तेषां चरणकमलेषु स्वभावभारितां प्रणतिं निवेद्य तेभ्यं कातज्ञवचांसि समर्पयामि।

डॉ. अतुल उनागरमहोदयानाम् चापि महनीयः सहयोगे मया लब्धः स्वकार्यसम्पादने च गुरूजी (डॉ. रामपालशुक्ल) सहशः समर्थमार्गदर्शको तेषां उनागरमहोदयानां सहयोगेन एव प्राप्तः अतो तेषामपि गुरुचरणानां पादपङ्कजेषु नत्वानिवेदनंपूर्वकं स्वीयं कृतज्ञभावं समर्पयामि।

एवमेव वास्तुशास्त्रे पारङ्गत डॉ. हेमुबेन राठोड़ महाभागानां चापि महनीयः सहयोगो मया स्वकार्यसाधने लब्धः अतः तासां चरणवृन्देष्वपि स्वभावाभियवित्तं निवेदयामि विभूषयामि च तान् कार्तज्ञवचोभिः।

अवसरेऽस्मिन् परमपूज्या मातृपितृचरणाः श्रीदेवीसिंह काणुसिंहजी गोहिल महोदयाः परमकारुण्यमय अनुपमवात्सल्यरूपा निषकमस्नेह

–सरितधारा श्रीमती ओत्तराबा डाह्यासिंहजी परमारमहाभागाश्च सादरं सश्रद्धश्च स्मर्यन्ते प्रणम्यन्ते च। तेषां परमतपस एव फलमस्ति यत् अद्याहं

शोधकर्मणि साफल्यं प्राप्नोमि, मातृ–पितृचरणानां कातज्ञविज्ञापने मत्पार्श्वे शब्दाभावो वर्तते। यतोहि –

यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्याः कर्तुं वर्षशतैरापि।। अतोऽस्मान् क्रमे हार्दिकी श्रद्धामयीं च भावाभिव्यक्तिं समर्पये तत्चरणकमलेषु।

अस्मिन्नवसरे परमपूज्या पितामहचरणाः श्री वाणुसिंह, मोतीसिंहजी गोहिल–अनुभवेचरज्ञानवृद्धा श्री जीबा–बा–भगतसिंहजी चौहाण पितामही–महाभागश्च सादरं–सश्रद्धगम्य स्मर्यन्ते प्रणम्यन्ते च।

शोधकार्येऽस्मिन् मह्यमापि अधिकं अस्यकार्यस्य चिन्ताकर्षकः प्रबन्धनिर्माझातारभ्य प्रत्येके क्षणे उत्साहवर्धनाय प्रेरणाप्रदात्रा निबन्धकार्यायावकाशविमात्राः मम् सहधर्मचारिण्या श्रीमती रुपकुंवरबाा बाबुसिंहजी झाला अपि सहयोग वरीवर्तते। यया गृहभारात् विमुक्ति प्रदाता। वस्तुतः तस्याः सहयोगेनाभावे अस्य दुष्करंप्रबन्धस्यकार्यमिदं पूर्णं कर्तुं नैव शक्यते। अन्ये च सर्वेऽपि स्वपरिवारसदस्याः सादरं स्मर्यन्ते साधुवादैश्च विमुष्यन्ते येषां ममोपरि सर्वदा शुभाशंसा वर्तते।

मम शोधप्रबन्धेऽनेके सहाध्यायिनः सहकर्मचारिणः उपकारकाः स्नेहभाज आसन् तान् सर्वान् साधुभावेन आदरभावेन् च प्रणम्य सम्मान्य अन्ते च तेषां सर्वेषां कृते कृतज्ञतां प्रयच्छामि। यैः प्रत्यक्षरूपेण–परोक्षरूपेण च मम सहयोगो विहितः। सर्वेषां नामग्रहणमत्रासम्भवमस्ति। अतः सर्वेऽपि मनसा प्रणम्यन्ते साधुवादैश्च विभूष्यन्ते। टंकणकार्यकर्तारं श्रीमन्तं सरलबुद्धिं डॉ. राजदेवमिश्र महोदयं स्नेहेन सम्भावयामि योऽसौ समुदारभावनया अस्य

शोधकार्यस्य अंकणकर्मणा समापयत। टंकणकत्रे राजदेवमिश्रमहोदयाय अपि साधुवादं यच्छामि येन निष्ठया टंकणकार्यं सम्पादितम्।

अन्ते कुलपरम्पराध्यात्मिकगुरु समर्थश्री मोहनगीरीं कुलदेवी श्रीभाथीजी महाराजं गोहिलवंशस्य इष्टदेयं एकलिंगजीमहादेवंमाता चामुण्डां च महात श्रद्धाभावेनत्मसमर्णणेन चरणस्पर्शपूर्वकं प्रणमामि। येषां कृपयाऽहं स्वाध्यायं प्रबन्धं च परिपूर्णं कृतवान्।

इति शम्

**गोहेल जयसिंह देवीसिंह**